श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री अनन्ताळ्वान् विरचित

# ॥ श्रीरामानुजचतुःश्लोकी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरामानुजचतुःश्लोकी ॥

अनिशं भजतामनन्यभाजां
    चरणाम्भोरुहमादरेण पुंसाम्।
वितरन्निभृतं विभूतिमिष्टां
    जय रामानुज! रङ्गधाम्नि नित्यम्॥ १ ॥

भुविनोविमतांस्त्वदीयसूक्तिः
    कुलिशीभूय कुदृष्टिभिस्समेतान्।
शकलीकुरुते विपश्चिदीड्या
    जय रामानुज! शेषशैलशृङ्गे॥ २ ॥

श्रुतिषु स्मृतिषु प्रमाणतत्त्वं
    कृपयालोक्य विशुद्धया हि बुद्ध्या।
अकृथास्स्वत एव भाष्यरत्नं
    जय रामानुज! हस्तिधाम्नि नित्यम्॥ ३ ॥

जय मायिमतान्धकारभानो!
    जय बाह्यप्रमुखाटवीकृशानो!।
जय संश्रितसिन्धुशीतभानो!
    जय रामानुज! यादवाद्रिशृङ्गे॥ ४ ॥

रामानुजचतुःश्लोकीं यः पठेन्नियतस्सदा।
प्राप्नुयात् परमां भक्तिं यतिराजपदाब्जयोः॥ ५ ॥

॥ इति श्रीरामानुजचतुःश्लोकी समाप्ता ॥

www.prapatti.com